# Raghuvansha 12 by Kalidas

# રઘુવંશં સર્ગઃ ૧૨ કાલિદાસકૃતમ્

## Document Information

Text title : raghuvansha12

File name : raghuvansha12.itx

Category : major_works, kAlidAsa

Location : doc_z_misc_major_works

Author : kalidasa

Transliterated by : Arvind Kolhatkar akolhatkar at rogers.com

Proofread by : Arvind Kolhatkar akolhatkar at rogers.com

Latest update : August 23, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

Raghuvansha 12 by Kalidas

# રઘુવંશં સર્ગઃ ૧૨ કાલિદાસકૃતમ્

નિર્દિષ્ટવિષયસ્નેહઃ સ દશાન્તમુપેયિવાન્ ।
આસીદાસન્નનિર્વાણઃ પ્રદીપાર્ચિરિવોષસિ ॥ ૧૨-૧ ॥

તં કર્ણમૂલમાગત્ય રામે શ્રીર્ન્યસ્યતામિતિ ।
કૈકેયીશઙ્કયીવાહ પલિતચ્છદ્મના જરા ॥ ૧૨-૨ ॥

સા પૌરાન્પૌરકાન્તસ્ય રામસ્યાભ્યુદયશ્રુતિઃ ।
પ્રત્યેકં હ્રાદયાંચક્રે કુલ્યેનોદ્યાનપાદપાન્ ॥ ૧૨-૩ ॥

તસ્યાભિષેકસંભારે કલ્પિતં ક્રૂરનિશ્ચયા ।
દૂષયામાસ કૈકેયી શોકોષ્ણૈઃ પાર્થિવાશ્રુભિઃ ॥ ૧૨-૪ ॥

સા કિલાશ્વાસિતા ચણ્ડી ભર્ત્રા તત્સંશ્રુતૌ વરૌ ।
ઉદ્વવામેન્દ્રસિક્તા ભૂર્બિલમગ્નાવિવોરગૌ ॥ ૧૨-૫ ॥

તયોશ્ચતુર્દશૈકેન રામં પ્રાવ્રાજયત્સમાઃ ।
દ્વિતીયેન સુતસ્યૈચ્છદ્વૈધવ્યૈકફલાં શ્રિયમ્ ॥ ૧૨-૬ ॥

પિત્રા દત્તં રુદન્રામઃ પ્રાઙ્મહીં પ્રત્યપદ્યત ।
પશ્ચાદ્વનાય ગચ્છેતિ તદાજ્ઞાં મુદિતોઽગ્રહીત્ ॥ ૧૨-૭ ॥

દધતો મઙ્ગલક્ષૌમે વસાનસ્ય ચ વલ્કલે ।
દદૃશુર્વિસ્મિતાસ્તસ્ય મુખરાગં સમં જનાઃ ॥ ૧૨-૮ ॥

સ સીતાલક્ષ્મણસખઃ સત્યાદ્ગુરુમલોપયન્ ।
વિવેશ દણ્ડકારણ્યં પ્રત્યેકં ચ સતાં મનઃ ॥ ૧૨-૯ ॥

રાજાપિ તદ્વિયોગાર્તઃ સ્મૃત્વા શાપં સ્વકર્મજમ્ ।
શરીરત્યાગમાત્રેણ શુદ્ધિલાભમમન્યત ॥ ૧૨-૧૦ ॥

વિપ્રોષિતકુમારં તદ્રાજ્યમસ્તમિતેશ્વરમ્ ।
રન્ધ્રાન્વેષણદક્ષાણાં દ્વિષામામિષતતાં યયૌ ॥ ૧૨-૧૧ ॥

અથાનાથાઃ પ્રકૃતયો માતૃબન્ધુનિવાસિનમ્ ।
મૌલૈરાનાયયામાસુર્ભરતં સ્તમ્ભિતાશ્રુભિઃ ॥ ૧૨-૧૨ ॥

શ્રુત્વા તથાવિધં મૃત્યું કૈકેયીતનયઃ પિતુઃ ।
માતુર્ન કેવલં સ્વસ્યાઃ શ્રિયોઽપ્યાસીત્પરાઙ્મુખઃ ॥ ૧૨-૧૩ ॥

સસૈન્યશ્ચાન્વગાદ્રામં દર્શિતાનાશ્રમાલયૈઃ ।
તસ્ય પશ્યન્સસૌમિત્રેરુદશ્રુર્વસતિદ્રુમાન્ ॥ ૧૨-૧૪ ॥

ચિત્રકૂટવનસ્થં ચ કથિતસ્વર્ગતિર્ગુરોઃ ।
લક્ષ્મ્યા નિમન્ત્રયાંચક્રે તમનુચ્છિષ્ટસંપદા ॥ ૧૨-૧૫ ॥

સ હિ પ્રથમજે તસ્મિન્નકૃતશ્રીપરિગ્રહે ।
પરિવેત્તારમાત્માનં મેને સ્વીકરણાદ્ભુવઃ ॥ ૧૨-૧૬ ॥

તમશક્યમપાક્રષ્ટું નિદેશાત્સ્વર્ગિણઃ પિતુઃ ।
યયાચે પાદુકે પશ્ચાત્કર્તું રાજ્યાધિદેવતે ॥ ૧૨-૧૭ ॥

સ વિસૃષ્ટસ્તથેત્યુક્ત્વા ભ્રાત્રા નૈવાવિશત્પુરીમ્ ।
નન્દિગ્રામગતસ્તસ્ય રાજ્યં ન્યાસમિવાભુનક્ ॥ ૧૨-૧૮ ॥

દૃઢભક્તિરિતિ જ્યેષ્ઠે રાજ્યતૃષ્ણાપરાઙ્મુખઃ ।
માતુઃ પાપસ્ય ભરતઃ પ્રાયશ્ચિત્તમિવાકરોત્ ॥ ૧૨-૧૯ ॥

રામોઽપિ સહ વૈદેહ્યા વને વન્યેન વર્તયન્ ।
ચચાર સાનુજઃ શાન્તો વૃદ્ધેક્ષ્વાકુવ્રતં યુવા ॥ ૧૨-૨૦ ॥

પ્રભાવસ્તમ્ભિતચ્છાયમાશ્રિતઃ સ વનસ્પતિમ્ ।
કદાચિદઙ્કે સીતાયાઃ શિશ્યે કિંચિદિવ શ્રમાત્ ॥ ૧૨-૨૧ ॥

ઐન્દ્રિઃ કિલ નખૈસ્તસ્યા વિદદાર સ્તનૌ દ્વિજઃ ।
પ્રિયોપભોગચિહ્નેષુ પૌરોભાગ્યમિવાચરન્ ॥ ૧૨-૨૨ ॥

તસ્મિન્નસ્થદિષીકાસ્ત્રં રામો રામાવબોધિતઃ ।
આત્માનં મુમુચે તસ્માદેકનેત્રવ્યયેન સઃ ॥ ૧૨-૨૩ ॥

રામસ્ત્વાસન્નદેશત્વાદ્ભરતાગમનં પુનઃ ।
આશઙ્ક્યોત્સુકસારઙ્ગાં ચિત્રકૂટસ્થલીં જહૌ ॥ ૧૨-૨૪ ॥

પ્રયયાવાતિથેયેષુ વસન્નૃષિકુલેષુ સઃ ।
દક્ષિણાં દિશમૃક્ષેષુ વાર્ષિકેષ્વિવ ભાસ્કરઃ ॥ ૧૨-૨૫ ॥

બભ્રૌ તમનુગચ્છન્તી વિદેહાધિપતેઃ સુતા ।
પ્રતિષિદ્ધાપિ કૈકેય્યા લક્ષ્મીરિવ ગુણોન્મુખી ॥ ૧૨-૨૬ ॥

અનસૂયાતિસૃષ્ટેન પુણ્યગન્ધેન કાનનમ્ ।
સા ચકારાઙ્ગરાગેણ પુષ્પોચ્ચલિતષટ્પદમ્ ॥ ૧૨-૨૭ ॥

સંધ્યાભ્રકપિશસ્તસ્ય વિરાધો નામ રાક્ષસઃ ।
અતિષ્ઠન્માર્ગમાવૃત્ય રામસ્યેન્દોરિવ ગ્રહઃ ॥ ૧૨-૨૮ ॥

સ જહાર તયોર્મધ્યે મૈથિલીં લોકશોષણઃ ।
નભોનભસ્યયોર્વૃષ્ટિમવગ્રહ ઇવાન્તરે ॥ ૧૨-૨૯ ॥

તં વિનિષ્પિષ્ય કાકુત્સ્થૌ પુરા દૂષયતિ સ્થલીમ્ ।
ગન્ધેનાશુચિના ચેતિ વસુધાયાં નિચખ્નતુઃ ॥ ૧૨-૩૦ ॥

પઞ્ચવટ્યાં તતો રામઃ શાસનાત્કુમ્ભજન્મનઃ ।
અનપોઢસ્થિતિસ્તસ્થૌ વિન્ધ્યાદ્રિઃ પ્રકૃતાવિવ ॥ ૧૨-૩૧ ॥

રાવણાવરજા તત્ર રાઘવં મદનાતુરા ।
અભિપેદે નિદાઘાર્તા વ્યાલીવ મલયદ્રુમમ્ ॥ ૧૨-૩૨ ॥

સા સીતાસંનિધાવેવ તં વવ્રે કથિતાન્વયા ।
અત્યારૂઢો હિ નારીણામકાલજ્ઞો મનોભવઃ ॥ ૧૨-૩૩ ॥

કલત્રવાનહં બાલે કનીયાંસં ભજસ્વ મે ।
ઇતિ રામો વૃષસ્યન્તીં વૃષસ્કન્ધઃ શશાસ તામ્ ॥ ૧૨-૩૪ ॥

જ્યેષ્ઠાભિગમનાત્પૂર્વં તેનાપ્યનભિનન્દિતામ્ ।
સાઽભૂદ્રામાશ્રયા ભૂયો નદીવોભયકૂલભાક્ ॥ ૧૨-૩૫ ॥

સંરમ્ભં મૈથિલીહાસઃ ક્ષણસૌમ્યાં નિનાય તામ્ ।
નિવાતસ્તિમિતાં વેલાં ચન્દ્રોદય ઇવોદધેઃ ॥ ૧૨-૩૬ ॥

ફલમસ્યોપહાસસ્ય સદ્યઃ પ્રાપ્સ્યસિ પશ્ય મામ્ ।
મૃગ્યાઃ પરિભવો વ્યાઘ્ર્યામિત્યવેહિ ત્વયા કૃતમ્ ॥ ૧૨-૩૭ ॥

ઇત્યુક્ત્વા મૈથિલીં ભર્તુરઙ્કે નિવિશતીં ભયાત્ ।
રૂપં શૂર્પણખા નામ્નઃ સદૃશં પ્રત્યપદ્યત ॥ ૧૨-૩૮ ॥

લક્ષ્મણઃ પ્રથમં શ્રુત્વા કોકિલામઞ્જુવાદિનીમ્ ।

શિવાઘોરસ્વનાં પશ્ચાદ્બુબુધે વિકૃતેતિ તામ્ ॥ ૧૨-૩૯ ॥

પર્ણશાલામથ ક્ષિપ્રં વિકૃષ્ટાસિઃ પ્રવિશ્ય સઃ ।
વૈરૂપ્યપૌનરુક્ત્યેન ભીષણાં તામયોજયત્ ॥ ૧૨-૪૦ ॥

સા વક્રનખધારિણ્યા વેણુકર્કશપર્વયા ।
અઙ્કુશાકારયાઙ્ગુલ્યા તાવતર્જયદમ્બરે ॥ ૧૨-૪૧ ॥

પ્રાપ્ય ચાશુ જનસ્થાનં ખરાદિભ્યસ્તથાવિધમ્ ।
રામોપક્રમમાચખ્યૌ રક્ષઃપરિભવં નવમ્ ॥ ૧૨-૪૨ ॥

મુખાવયવલૂનાં તાં નૈરૃતા યત્પુરો દધુઃ ।
રામાભિયાયિનાં તેષાં તદેવાભૂદમઙ્ગલમ્ ॥ ૧૨-૪૩ ॥

ઉદાયુધાનાત્પતતસ્તાન્દૃપ્તાન્પ્રેક્ષ્ય રાઘવઃ ।
નિદધે વિજયાશંસાં ચાપે સીતાં ચ લક્ષ્મણે ॥ ૧૨-૪૪ ॥

એકો દાશરથિઃ કામં યાતુધાનાઃ સહસ્રશઃ ।
તે તુ યાવન્ત એવાજૌ તાવાંશ્ચ દદૃશે સ તૈઃ ॥ ૧૨-૪૫ ॥

અસજ્જનેન કાકુત્સ્થઃ પ્રયુક્તમથ દૂષણમ્ ।
ન ચક્ષમે શુભાચારઃ સ દૂષણમિવાત્મનઃ ॥ ૧૨-૪૬ ॥

તં શરૈઃ પ્રતિજગ્રાહ ખરત્રિશિરસૌ ચ સઃ ।
ક્રમશસ્તે પુનસ્તસ્ય ચાપાત્સમમિવોદ્યયુઃ ॥ ૧૨-૪૭ ॥

તૈસ્ત્રયાણાં શિતૈર્બાણૈર્યથાપૂર્વવિશુદ્ધિભિઃ ।
આયુર્દેહાતિગૈઃ પીતં રુધિરં તુ પતત્રિભિઃ ॥ ૧૨-૪૮ ॥

તસ્મિન્રામશરોત્કૃત્તે બલે મહતિ રક્ષસામ્ ।
ઉત્થિતં દદૃશેઽન્યચ્ચ કબન્ધેભ્યો ન કિંચન ॥ ૧૨-૪૯ ॥

સા બાણવર્ષિણં રામં યોધયિત્વા સુરદ્વિષામ્ ।
અપ્રબોધાય સુષ્વાપ ગૃધ્રચ્છાયે વરૂથિની ॥ ૧૨-૫૦ ॥

રાઘવાસ્ત્રવિદીર્ણાનાં રાવણં પ્રતિ રક્ષસામ્ ।
તેષાં શૂર્પણખૈવૈકા દુષ્પ્રવૃત્તિહરાઽભવત્ ॥ ૧૨-૫૧ ॥

નિગ્રહાત્સ્વસુરાપ્તાનાં વધાચ્ચ ધનદાનુજઃ ।
રામેણ નિહિતં મેને પદં દશસુ મૂર્ધસુ ॥ ૧૨-૫૨ ॥

રક્ષસા મૃગરૂપેણ વઞ્ચયિત્વા સ રાઘવૌ ।
જહાર સીતાં પક્ષીન્દ્રપ્રયાસક્ષણવિઘ્નિતઃ ॥ ૧૨-૫૩ ॥

તૌ સીતાવેષિણૌ ગૃધ્રં લૂનપક્ષમપશ્યતામ્ ।
પ્રાણૈર્દશરથપ્રીતેરનૃણં કણ્ઠવર્તિભિઃ ॥ ૧૨-૫૪ ॥

સ રાવણહૃતાં તાભ્યાં વચસાચષ્ટ મૈથિલીમ્ ।
આત્મનઃ સુમહત્કર્મ વ્રણૈરાવેદ્ય સંસ્થિતઃ ॥ ૧૨-૫૫ ॥

તયોસ્તસ્મિન્નવીભૂતપિતૃવ્યાપત્તિશોકયોઃ ।
પિતરીવાગ્નિસંસ્કારાત્પરા વવૃતિરે ક્રિયાઃ ॥ ૧૨-૫૬ ॥

વધનિર્ધૂતશાપસ્ય કબન્ધસ્યોપદેશતઃ ।
મુમૂર્ચ્છ સખ્યં રામસ્ય સમાનવ્યસને હરૌ ॥ ૧૨-૫૭ ॥

સ હત્વા વાલિનં વીરસ્તત્પદે ચિરકાઙ્ક્ષિતે ।
ધાતોઃ સ્થાન ઇવાદેશં સુગ્રીવં સંન્યવેશયત્ ॥ ૧૨-૫૮ ॥

ઇતસ્તતશ્ચ વૈદેહીમન્વેષ્ટું ભર્તૃચોદિતાઃ ।
કપયશ્ચેરુરાર્તસ્ય રામસ્યેવ મનોરથાઃ ॥ ૧૨-૫૯ ॥

પ્રવૃત્તાવુપલબ્ધાયાં તસ્યાઃ સંપાતિદર્શનાત્ ।
મારુતિઃ સાગરં તીર્ણઃ સંસારમિવ નિર્મમઃ ॥ ૧૨-૬૦ ॥

દૃષ્ટા વિચિન્વતા તેન લઙ્કાયાં રાક્ષસીવૃતા ।
જાનકી વિષવલ્લીભિઃ પરિતેવ મહૌષધિઃ ॥ ૧૨-૬૧ ॥

તસ્યૈ ભર્તુરભિજ્ઞાનમઙ્ગુલીયં દદૌ કપિઃ ।
પ્રત્યુદ્ગતમિવાનુષ્ણૈસ્તદાનન્દાશ્રુબિન્દુભિઃ ॥ ૧૨-૬૨ ॥

નિર્વાપ્ય પ્રિયસંદેશૈઃ સીતામક્ષવધોદ્ધતઃ ।
સ દદાહ પુરીં લઙ્કાં ક્ષણસોઢારિનિગ્રહઃ ॥ ૧૨-૬૩ ॥

પ્રત્યભિજ્ઞાનરત્નં ચ રામાયાદર્શયત્કૃતી ।
હૃદયં સ્વયમાયાતં વૈદેહ્યા ઇવ મૂર્તિમત્ ॥ ૧૨-૬૪ ॥

સ પ્રાપ હૃદયન્યસ્તમણિસ્પર્શનિમીલિતઃ ।
અપયોધરસંસર્ગાં પ્રિયાલિઙ્ગનનિર્વૃતિમ્ ॥ ૧૨-૬૫ ॥

શ્રુત્વા રામઃ પ્રિયોદન્તં મેને તત્સઙ્ગમોત્સુકઃ ।
મહાર્ણવપરિક્ષેપં લઙ્કાયાઃ પરિખાલઘુમ્ ॥ ૧૨-૬૬ ॥

સ પ્રતસ્થેઽરિનાશાય હરિસૈન્યૈરનુદ્રુતઃ ।
ન કેવલં ભુવઃ પૃષ્ઠે વ્યોમ્નિ સંબાધવર્તિભિઃ ॥ ૧૨-૬૭ ॥

નિવિષ્ટમુદધેઃ કૂલે તં પ્રપાદ બિભીષણઃ ।
સ્નેહાદ્રાક્ષસલક્ષ્મ્યેવ બુદ્ધિમાવિશ્ય ચોદિતઃ ॥ ૧૨-૬૮ ॥

તસ્મૈ નિશાચરૈશ્વર્યં પ્રતિશુશ્રાવ રાઘવઃ ।
કાલે ખલુ સમાલબ્ધાઃ ફલં બધ્નન્તિ નીતયઃ ॥ ૧૨-૬૯ ॥

સ સેતું બન્ધયામાસ પ્લવગૈર્લવણામ્ભસિ ।
રસાતલાદિવોન્મગ્નં શેષં સ્વપ્નાય શાર્ઙ્ગિણઃ ॥ ૧૨-૭૦ ॥

તેનોત્તીર્ય પથા લઙ્કાં રોધયામાસ પિઙ્ગલૈઃ ।
દ્વિતીયં હેમપ્રાકારં કુર્વદ્ભિરિવ વાનરૈઃ ॥ ૧૨-૭૧ ॥

રણઃ પ્રવવૃતે તત્ર ભીમઃ પ્લવગરક્ષસામ્ ।
દિગ્વિજૃમ્ભિતકાકુત્સ્થપૌલસ્ત્યજયઘોષણઃ ॥ ૧૨-૭૨ ॥

પાદપાવિદ્ધપરિઘઃ શિલાનિષ્પિષ્ટમુદ્ગરઃ ।
અતિશસ્ત્રનખન્યાસઃ શૈલરુગ્ણમતંગજઃ ॥ ૧૨-૭૩ ॥

અથ રામશિરશ્છેદદર્શનોદ્ભ્રાન્તચેતનામ્ ।
સીતાં માયેતિ શંસન્તી ત્રિજટા સમજીવયત્ ॥ ૧૨-૭૪ ॥

કામં જીવતિ મે નાથ ઇતિ સા વિજહૌ શુચમ્ ।
પ્રાઙ્મત્વા સત્યમસ્યાન્તં જીવિતાસ્મીતિ લજ્જિતા ॥ ૧૨-૭૫ ॥

ગરુડાપાતવિશ્લિષ્ટમેઘનાદાસ્ત્રબન્ધનઃ ।
દાશરથ્યોઃ ક્ષણક્લેશઃ સ્વપ્નવૃત્ત ઇવાભવત્ ॥ ૧૨-૭૬ ॥

તતો બિભેદ પૌલસ્ત્યઃ શક્ત્યા વક્ષસિ લક્ષ્મણમ્ ।
રામસ્ત્વનાહતોઽપ્યાસીદ્વિદીર્ણહૃદયઃ શુચા ॥ ૧૨-૭૭ ॥

સ મારુતિસમાનીતમહૌષધિહતવ્યથઃ ।
લઙ્કાસ્ત્રીણાં પુનશ્ચક્રે વિલાપાચાર્યકં શરૈઃ ॥ ૧૨-૭૮ ॥

સ નાદં મેઘનાદસ્ય ધનુશ્ચેન્દ્રાયુધપ્રભમ્ ।
મેઘસ્યેવ શરત્કાલો ન કિઞ્ચિત્પર્યશેષયત્ ॥ ૧૨-૭૯ ॥

કુમ્ભકર્ણઃ કપીન્દ્રેણ તુલ્યાવસ્થઃ સ્વસુઃ કૃતઃ ।

રુરોધ રામં શ‍ૃઙ્ગીવ ટઙ્કચ્છિન્નમનઃશિલઃ ॥ ૧૨-૮૦ ॥

અકાલે બોધિતો ભ્રાતા પ્રિયસ્વપ્નો વૃથા ભવાન્ ।
રામેષુભિરિતીવાસૌ દીર્ઘનિદ્રાં પ્રવેશિતઃ ॥ ૧૨-૮૧ ॥

ઇતરાણ્યપિ રક્ષાંસિ પેતુર્વાનરકોટિષુ ।
રજાંસિ સમરોત્થાનિ તચ્છોણિતનદીષ્વિવ ॥ ૧૨-૮૨ ॥

નિર્યયાવથ પૌલસ્ત્યઃ પુનર્યુદ્ધાય મન્દિરાત્ ।
અરાવણમરામં વા જગદદ્યેતિ નિશ્ચિતઃ ॥ ૧૨-૮૩ ॥

રામં પદાતિમાલોક્ય લઙ્કેશં ચ વરૂથિનમ્ ।
હરિયુગ્યં રથં તસ્મૈ પ્રજિઘાય પુરંદરઃ ॥ ૧૨-૮૪ ॥

તમાધૂતધ્વજપટં વ્યોમગઙ્ગોર્મિવાયુભિઃ ।
દેવસૂતભુજાલમ્બી જૈત્રમધ્યાસ્ત રાઘવઃ ॥ ૧૨-૮૫ ॥

માતલિસ્તસ્ય માહેન્દ્રમામુમોચ તનુચ્છદમ્ ।
યત્રોત્પલદલક્લૈબ્યમસ્ત્રાણ્યાપુઃ સુરદ્વિષામ્ ॥ ૧૨-૮૬ ॥

અન્યોન્યદર્શનપ્રાપ્તવિક્રમાવસરં ચિરાત્ ।
રામરાવણયોર્યુદ્ધં ચરિતાર્થમિવાભવત્ ॥ ૧૨-૮૭ ॥

ભુજમૂર્ધોરુબાહુલ્યાદેકોઽપિ ધનદાનુજઃ ।
દદૃશે હ્યયથાપૂર્વો માતૃવંશ ઇવ સ્થિતઃ ॥ ૧૨-૮૮ ॥

જેતારં લોકપાલાનાં સ્વમુખૈરર્ચિતેશ્વરમ્ ।
રામસ્તુલિતકૈલાસમારાતિં બહ્વમન્યત ॥ ૧૨-૮૯ ॥

તસ્ય સ્ફુરતિ પૌલસ્ત્યઃ સીતાસંગમશંસિનિ ।
નિચખાનાધિકક્રોધઃ શરં સવ્યેતરે ભુજે ॥ ૧૨-૯૦ ॥

રાવણસ્યાપિ રામાસ્તો ભિત્ત્વા હૃદયમાશુગઃ ।
વિવેશ ભુવમાખ્યાતુમુરગેભ્ય ઇવ પ્રિયમ્ ॥ ૧૨-૯૧ ॥

વચસૈવ તયોર્વાક્યમસ્ત્રમસ્ત્રેણ નિઘ્નતોઃ ।
અન્યોન્યજયસંરમ્ભો વવૃધે વાદિનોરિવ ॥ ૧૨-૯૨ ॥

વિક્રમવ્યતિહારેણ સામાન્યાઽભૂદ્દ્વયોરપિ ।
જયશ્રીરન્તરા વેદિર્મત્તવારણયોરિવ ॥ ૧૨-૯૩ ॥

કૃતપ્રતિકૃતપ્રીતૈસ્તયોર્મુક્તાં સુરાસુરૈઃ ।
પરસ્પરશરવ્રાતાઃ પુષ્પવૃષ્ટિં ન સેહિરે ॥ ૧૨-૯૪ ॥

અયઃશઙ્કુચિતાં રક્ષઃ શતઘ્નીમથ શત્રવે ।
હૃતાં વૈવસ્વતસ્યેવ કૂટશાલ્મલિમક્ષિપત્ ॥ ૧૨-૯૫ ॥

રાઘવો રથમપ્રાપ્તાં તામાશાં ચ સુરદ્વિષામ્ ।
અર્ધચન્દ્રમુખૈર્બાણૈશ્ચિચ્છેદ કદલીસુખમ્ ॥ ૧૨-૯૬ ॥

અમોઘં સંદધે ચાસ્મૈ ધનુષ્યેકધનુર્ધરઃ ।
બ્રાહ્મમસ્ત્રં પ્રિયાશોકશલ્યનિષ્કર્ષણૌષધમ્ ॥ ૧૨-૯૭ ॥

તદ્વ્યોમ્નિ શતધા ભિન્નં દદૃશે દીપ્તિમન્મુખમ્ ।
વપુર્મહોરગસ્યેવ કરાલફલમણ્ડલમ્ ॥ ૧૨-૯૮ ॥

તેન મન્ત્રપ્રયુક્તેન નિમેષાર્ધાદપાતયત્ ।
સ રાવણશિરઃપઙ્ક્તિમજ્ઞાતવ્રણવેદનામ્ ॥ ૧૨-૯૯ ॥

બાલાર્કપ્રતિમેવાપ્સુ વીચિભિન્ના પતિષ્યતઃ ।
રરાજ રક્ષઃકાયસ્ય કણ્ઠચ્છેદપરમ્પરા ॥ ૧૨-૧૦૦ ॥

મરુતાં પશ્યતાં તસ્ય શિરાંસિ પતિતાન્યપિ ।
મનો નાતિવિશસ્વાસ પુનઃસંધાનશઙ્કિનામ્ ॥ ૧૨-૧૦૧ ॥

અથ મદગુરુપક્ષૈલોકપાલદ્વિપાના-
મનુગતમલિવૃન્દૈર્ગણ્ડભિત્તીર્વિહાય ।
ઉપનતમણિબન્ધે મૂર્ધ્નિ પૌલસ્ત્યશત્રોઃ
સુરભિ સુરવિમુક્તં પુષ્પવર્ષં પપાત ॥ ૧૨-૧૦૨ ॥

યન્તા હરેઃ સપદિ સંહૃતકાર્મુકજ્ય-
માપૃચ્છ્ય રાઘવમનુષ્ઠિતદેવકાર્યમ્ ।
નામાઙ્કરાવણશરાઙ્કિતકેતુયષ્ટિ-
મૂર્ધ્વં રથં હરિસહસ્રયુજં નિનાય ॥ ૧૨-૧૦૩ ॥

રઘુપતિરપિ જાતવેદોવિશુદ્ધાં પ્રગૃહ્ય પ્રિયાં
પ્રિયસુહૃદિ બિભીષણે સંગમય્ય શ્રિયં વૈરિણઃ ।
રવિસુતસહિતેન તેનાનુયાતઃ સસૌમિત્રિણા
ભુજવિજિતવિમાનરત્નાધિરૂઢઃ પ્રતસ્થે પુરીમ્ ॥ ૧૨-૧૦૪ ॥

ઇતિ શ્રીરઘુવંશે મહાકાવ્યે કવિશ્રીકાલિદાસકૃતૌ
રાવણવધો નામ દ્વાદશઃ સર્ગઃ ॥

Encoded and proofread by Arvind Kolhatkar akolhatkar at rogers.com

*Raghuvansha 12 by Kalidas*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*